प्रत्येकं घटादौ न द्वित्वादि । तादृशसम्बन्धस्य अपेक्षाबुद्धिसापेक्षत्वेन तत्सत्त्वे तथा ज्ञानं, तदसत्त्वे न तथाज्ञानम् । तत्र प्रथमम् अयमेकः अयमेक इत्याकारिका अपेक्षाबुद्धिस्ततोद्वित्वोत्पत्तिः ततो द्वित्वद्वित्वत्वनिर्विकल्पकं ततोद्वित्वप्रत्यक्षम् । अपेक्षाबुद्धिनाशाच्च ततोद्वित्वनाशः इति । यद्यपि योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यत्वेन ज्ञानमात्रस्य द्विक्षणस्थायित्वं तथापि अगत्या अपेक्षाबुद्धेस्त्रिक्षणस्थायित्वं स्वीक्रियते अन्यथा निर्विकल्पककाले अपेक्षाबुद्धिनाशे द्वित्वस्य नाशः प्रसज्येत न तु द्वित्वप्रत्यक्षं तदानीं विषयाभावात् विषयस्य प्रत्यक्षं प्रति कार्य्यकालवृत्तितयैव कारणत्वोपगमात् तथा च द्वित्वप्रत्यक्षमेवापेक्षाबुद्धिनाशकं नान्यदिति कल्प्यते । कालान्तरे द्वित्वप्रत्यक्षाभावाच्च अपेक्षाबुद्धिनाशात् द्वित्वादिनाशइति कल्प्यतइति सि०मु० ।

**अपेक्षित** त्रि० अप+ईक्ष–कर्म्मणि क्त । १ अपेक्षाविषयभूते २ आकाङ्क्षिते च । "अपेक्षितक्रियश्चेति त्रिधाऽपादानमिष्यत" इति हरिः ।

**अपेक्षिन्** त्रि० अप+ईक्ष–णिनि स्त्रियां ङीप् । अपेक्षावति स्वकार्य्यजननादौ इतरप्रयोजकतानुरोधिनि च ।

**अपेक्ष्य** त्रि० अप+ईक्ष–कर्म्मणि ण्यत् । १ अपेक्षणीये । भावे ल्यप् । अनुरुध्येत्यर्थे अव्य० "किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिप" इति किरा० ।

**अपेत** त्रि० अ+इण–कर्त्तरि क्त । १ अपगते अपसृते । "यं प्रव्रजन्तमनुपेतमपेतकृत्यमिति" भाग० २पलायिते च ।

**अपेतराक्षसी** स्त्री अपेतः राक्षस इव पातकं यस्याः गौ०ङीष् । तुलस्याम् राजनि० । तस्याः राक्षसतुल्यपापादिहरणाक्षमत्वम् । "दूर्वा दहति पापानि धात्री हरति पातकम् । हरितकी हरेद्रोगं तुलसी हरते त्रयम्" आ०त० स्कान्दोक्तेस्तस्याः पापादिहारित्वम् ।

**अपेय** त्रि० पा अर्हाद्यर्थे यत् न०त० । १ स्मृतौ निषिद्धपाने मद्यादौ "मद्यमदेयमपेयमनिग्राह्यमिति" ति०त०उश० एवमन्यानि अपेयानि स्मृतौ प्रसिद्धानि यथा "वर्ज्यं सलवणं क्षीरं यच्च विमथितं पयः । अनिर्द्दशायागोः क्षीरं पीत्वा चान्द्रायणं चरेदिति" आ० त० स्मृतिः । "अपः सुराभाजनस्था मद्यभाण्डे स्थितास्तथा पञ्चरात्रं पिबेत् पीत्वा शङ्खपुष्पीशृतं पय" इति मनुः । "शुनोच्छिष्टाः स्थिता ह्यापो यदि कश्चित् द्विजः पिबेत् शङ्खपुष्पीविपक्वेन त्र्यहं क्षीरेण वर्त्तयेदिति" यमः । "स्त्रियोच्छिष्टाः स्थिता आपो यदि कश्चित् पिबेद्द्विजः । शङ्खपुष्पीत्यादि० शङ्खः "शूद्रोच्छिष्टा स्थिताह्यापो यदि कश्चित् पिबेत् द्विजः । कुशमूलविपक्वेन त्र्यहं क्षीरेण वर्त्तयेदिति हारीतः "शुना संस्पृष्टभाण्डे तु रेतोमूत्रविदूषिते । जलक्षीरादिकं पीत्वा तप्तकृच्छ्रं समाचरेत्" लघुबौ० । "चण्डालकूपभाण्डेषु यस्त्वज्ञानाज्जलं पिबेत् प्रायश्चित्तं कथं तत्र वर्णे वर्णे विधीयते । चरेत् सान्तपनं विप्रः प्राजापत्यन्तु भूमिपः । तदर्द्धं तु चरेद्वैश्यः पादं शूद्रस्य निर्द्दिशेत्" आप० । "चण्डालपरिगृहीतं योह्यज्ञानाज्जलं पिबेत् । तस्य शुद्धिं विजानीयात् प्राजापत्येन नित्यश" इति आप० । "यस्तु चण्डालसंस्पृष्टं पिबेत् किञ्चिदकामतः स तु सान्तपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः" अङ्गिराः । "किञ्चिदिति जलक्षीरादिकमिति" प्रा०वि० । आममांसादौ न दोषः । "आमं मांसं घृतं क्षौद्रं स्नेहाश्च फलसम्भवाः । म्लेच्छभाण्डस्थिता दुष्टानिष्क्रान्ताः शुचयः स्मृताः" यमः "अन्त्यजैः खानिताः कूपास्तड़ागानि तथैव च । एषु स्नात्वा च पीत्वा च पञ्चगव्येन शुध्यति" आप० । जलान्तरालाभे तु तदप्यापदि पातुं शक्यते "अन्त्यजैः खानिते कूपे सेतौ वाप्यादिके तथा तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते इति वृद्धशाता० । "इदमत्यन्तापद्विषयमिति" प्रा० वि० । "भाण्डस्थिता अभोज्यानामपः पीत्वा पयोदधि । ब्राह्मणो क्षत्रियो वैश्यः शूद्रश्चैवोपसर्पति ब्रह्मकूर्चोपवासश्च याज्यवर्णस्य निष्कृतिः" परा० । उपसर्पति उपसर्पेत् प्रायश्चित्तमिति शेषः तदेवाह ब्रह्मकूर्चोपेति । "यदि विप्रः प्रमादेन शूद्रतोयं पिबेत् स्वयम् । उपोष्य विल्वपद्मानां पलाशस्य कुशस्य च । एतेषामुदकं पीत्वा तेन शुद्धिमवाप्नुयात्" शाता० । अत्रापवादः । "नवभाण्डेषु पानीयं विट्शूद्रक्षत्रजन्मनाम् । पेयं तदाहुर्विप्राणां पयोदधि तथैव च" जावा० । "घृतं तैलं पयःक्षीरं तथैवेक्षुरसो गुड़ः । शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति" शाता० । घृतादीनामाकरभाण्डस्थितानां न दोषः" शङ्खः । "पीतावशेषितं पीत्वा पानीयं ब्राह्मणः क्वचित् । त्रिरात्रं तु व्रतं कुर्य्याद्वामहस्तेन वा पुनः" शङ्खः । "वामेन केवलेनेति" प्रा०वि० । "प्रपामरण्ये घटके च कूपे द्रोण्यां जलं कोषगतास्तथापः । ऋतेऽपि शूद्रात्तदपेयमाहुरापद्गतो भूमिगताः पिबेत्ता" इति यमः । प्रपाजलं, कूपजलाहरणघटस्थजलं द्रोणी सेकपात्रविशेषः तज्जलं, खड्गादिकोषगतं जलञ्च शूद्रासम्बन्धेऽप्यपेयम् "आपदि तु तदेव जलं भूमिगतं कृत्वा ततः पात्रान्तरेणोद्धृत्य पेयमिति"